No. ९८५ · घ

Title भागवतपुराणेवेदस्तुतिः

Author वेदव्यासः

Extent २ Age

Subject अपूर्णम्

नं० ६८५-घ

भागवत पुराणे
वेदस्तुतिः
कर्त्ता वेदव्यासः
नं० ९८५-घ
पत्रे २ (द्वावेव) (अपूर्णम्)

पत्र २

नं० ६-८ ५-६।

वे. द.

श्रीगणेशाय नमः ॐ सरस्वत्यै नमः परीक्षिदुवाच एवं ब्रह्मन्ब्रह्मण्यनिर्देश्ये निर्गु
१ णे गुणवृत्तयः कथं चरंति श्रुतयः साक्षात्सदसतः परे १ श्रीशुक उवाच
बुद्धीन्द्रियमनःप्राणाञ्जनानामसृजत्प्रभुः मात्रार्थं च भवार्थं च आत्मनेऽकल्पनाय च २
सैषा ह्युपनिषद्ब्राह्मी पूर्वेषां पूर्वजैर्धृता श्रद्धया धारयेद्यस्तां क्षेमं गच्छेदकिंचनः ३
अत्र ते वर्णयिष्यामि गाथां नारायणान्वितां नारदस्य च संवादमृषेर्नारायणस्य च
४ एकदा नारदो लोकान्पर्यटन्भगवत्प्रियः सनातनमृषिं द्रष्टुं ययौ नारायणा
श्रमं ५ यो वै भारतवर्षेऽस्मिन्क्षेमाय स्वस्तये नृणां धर्मज्ञानशमोपेतमाकल्
पादास्थितस्तपः ६ तत्रोपविष्टमृषिभिः कलापग्रामवासिभिः परीतं प्रण
तोऽपृच्छदिदमेव कुरूद्वह ७ तस्मै ह्यवोचद्भगवानृषीणां शृण्वतामिदं यो ब्र

ह्लवाच: पूर्वेषांजनलोकनिवासिनां ८ श्रीभगवा. स्वयंभुवंब्रह्मसत्रंजनलो
केभवत्पुरा तत्रस्थानांमानसानांमुनीनामूर्ध्वरेतसाम् ९ श्वेतद्वीपंगतवतित्व
यिद्रष्टुंतदीश्वरं ब्रह्मवाद:सुसंवृत्त: श्रुतयोयत्रशेरते १० तत्रह्ययमभूत्प्र
श्नस्त्वांमांयमनुपृच्छसि ११ तुल्यश्रुततप:शीलास्तुल्यस्वीयारि॰श्रीसनंदन:
स्वसृष्टमिदमापी~~[illegible]~~यशयानंसहसक्तिभि: तदंतेबोधयांचक्रु
।स्तल्लिंगै:श्रुतय:पर: १२ यथाशयानंसम्राजंवंदनस्तत्पराक्रमै: प्रत्यूषेभ्ये
॰त्यसुश्लोकैर्बोधयंत्यनुजीविन: १३ श्रुतयऊ. जयजयजह्य[illegible]जामजितदो
॰षगृभीतगुणांत्वमसियदात्मनासमवरुद्धसमस्तभग: अगजगदोकसा
॰मखिलशक्त्यवबोधक~~[illegible]~~तेक्वचिदजयात्मनाचचरतोनुचरेन्निगम: १४

मध्यमा: अपिचक्रु: प्रवचनमेकंशु
श्रूषवोपरे १२

वृहदुपलब्धमेतदवयंत्यवशेषतयायतउदयास्तमयौविकृतेर्मृदिवाविकृतात्
अतऋषयोदधुस्त्वयिमनोवचनाचरितंकथमयथाभवंतिभुविदत्तपदानिनृ
णाम् १५ इतितवसूरयस्त्र्यधिपतेखिललोकमलक्षपणकथामृताब्धिमव
गाह्यतपांसिजहुः किमुतस्वधामविधुताशयकालगुणाःपरमभजंतियेपदम
जस्रसुखानुभवम् १६ दृतयइवश्वसंत्यसुभृतोयदितेनुविधामहदहमादयो
ण्डमसृजन्यदनुग्रहतः पुरुषविधोन्वयोत्रचरमोन्नमयादिषुयः सदसतः परंत्व
मथयदेष्ववशेषमृतम् १७ रामायनमः उदरमुपासतेयऋषिवर्त्मसुकूर्पदृशः
परिसरपद्धतिंहृदयमारुणयोदहरम् ततउदगादनंततवधामशिरःपरमंपु
नरिहयत्समेत्यनपतंतिकृतांतमुखे १८